श्रीः

श्रीमते रामानुजाय नमः

## *श्रीवेदान्ताचार्याष्टोत्तर शतनामस्तोत्रम्*

घंटावतारोऽनंतार्य तनयो वेंकटाधिपः /
श्रीरंगराजदौहित्रो द्वादशाब्दांतगर्भगः//१
विभवाब्दसमुत्पन्नः कन्याश्रवणसंभवः/
श्रीमल्लक्ष्मणयोग्यंशो वरदाचार्य दीक्षितः //२
रामानुजार्य संदृष्टस्सौपर्ण मनुचिंतकः /
ताक्ष्र्य दत्तवर श्शुद्धः प्रसादितहयाननः //३
अधीतसांग सकलश्रुति स्स्मृतिविदग्रणीः /
इतिहास पुराणज्ञ स्सुकवि स्तर्कतत्ववित् // ४
भाष्यकारो भयहर स्सुधाशी दुग्धराशिकृत् /
प्रधानप्रतितंत्रज्ञो देवतापारमार्थ्यवित् //५
श्रुतविद्य श्श्रावयिता श्रुतपाल श्श्रुतप्रदः /
श्रुतः पाण्डित्यदाता च कृतकृत्यः कृती सुधीः //६
निरस्तसांख्यः प्रत्युक्तयोगः काणादभंजनः /
अचिच्चैतन्यवादघ्नः क्षणिकाणुमतार्दनः //७
साकारधीनिराकर्ता शून्यवादतमोरविः /
कुदृष्ट्युरग पक्षीश स्सप्तभंगीविलोपकः //८
भेदाभेद मतच्छेत्ता धूतयादवकल्पनः /
अनीशवाद दंभोलिः पाखण्डमत खण्डनः //९
संरक्षितागम श्शंखचक्रधारणरक्षिता /
ऊर्ध्वपुण्ड्रांकनत्राता शुद्धसत्वमयाकृतिः //१०
यत्याचार प्रतिष्ठाता सर्वतंत्र स्वतंत्रधीः /
अवताररहस्यज्ञ अर्चासौन्दर्य सक्तधीः //११
अर्थपंचकतत्वज्ञ स्तत्वत्रय विशेषवित् /
भक्तियोगविरोधिघ्नो भक्तिमान् भगवत्प्रियः //१२
ज्ञानैकसारो द्वयविद्विभक्ताधिकृतित्रयः /
चतुःश्लोक्यर्थसारज्ञ स्सम्यग्ज्ञातांगपंचकः //१३
षडंगयोगनिर्णेता सप्ततंतुकृदुत्तमः /
अष्टाक्षरैकनिरतो नवमैकरसाश्रयः //१४
दशतात्पर्यविज्ञाता शतकृच्च सहस्रवित् /
स्थूललक्षोऽनेकनानाकोटिज्ञाननिवर्तकः //१५
धर्मशंकु स्साधुवृंदवंदितांघ्रिसरोरुहः /
पद्माक्षानन्दजनकः परावरविभागवित् //१६
त्यागशब्दार्थविद्धर्मवेदी विधिविशेषवित् /
उत्तमश्लोकभावज्ञः पंचकालपरायणः //१७
सुरसेव्यः पूर्णमना स्सूरींद्रप्रतिरूपकः /
कवितार्किकपंचास्यो निगमांचलदेशिकः //१८
वैद्यो मुनींद्र स्सर्वज्ञ उपकर्तोपकारवित् /

सत्संप्रदायस्थिरधीरनघ स्सत्यवाक्षुचिः //१९
साधुवृत्तिर्मुक्तडंभो जिताक्षो दीर्घबंधुमान् /
दयालु श्शासिता सर्वहिताचरणतत्परः //२०
महागुरु स्स्वर्णवर्ण स्सुबाहुः पुण्डरीकदृक् /
पवित्रपाणिर्व्याख्यानमुद्रांकित करांबुजः //२१
सव्यपाणितलन्यस्त दिव्यपुस्तकभूषणः /
परशीर्ष न्यस्तवामपादाब्जकटकोज्ज्वलः //२२
इतीदं देशिकेन्द्रस्य नाम्नामष्टोत्तरं शतम् /
संकीर्तयेदनुदिनं सर्वपापानुत्तये //२३
पठेन्नामशतं भक्त्या श्रुत्वा गुरुमुखांबुजात् /
प्रसादाद्देशिकेंद्रस्य भुक्तिमुक्ती समश्नुते //२४
एकैकमपि तन्नाम कीर्तयन् सकृदुत्तमम् /
सर्वान्कामानवाप्नोति किमुताष्टोत्तरं शतम् //२५

//इति श्रीवेदान्ताचार्याष्टोत्तर शतनामस्तोत्रम् सम्पूर्णम्//
**********************************